व्रतार्क (अपूर्ण) ①

॥ ॥अथव्रतार्कप्रारंभः॥ ॥१॥

॥श्रीगणेशाय नमः॥ श्रीविश्वेश्वराय नमः॥ ॥दिवाकरपदद्वंद्वं फलद्वंद्वं प्रदायकं॥ त्रैलोक्यन
मस्तोनाथ शंकरं तत्स्मरणमाश्रयेत्॥१॥ योजाग्निजकरसंदराद्रिमथ्ये निर्मथ्य प्रथिततरां धर्मा
रसिंधुं॥२॥ नामाभासंस्मरणामोहरं भरतबलल्लोचनाल्लिंगतेन भ्राम्यद्भूगाहभूरिभ्रमजन
नपैरोजानकीवल्लभांघ्री॥ नत्वा श्रीनीलकंठाय लपदकृपया लब्धशास्त्रार्थतत्त्वं कुर्वे श्री
शंकरो हंसहृद्यत्हृदंभोजलुब्धो व्रतार्कं॥३॥ अत्र वै स्वकर्तव्यविषयो नियतः॥ संक
ल्पो व्रतमिति श्रीदत्तः॥ अत्र अग्निहोत्रसंध्यावंदनादिविषये संकल्प इति॥ प्रसक्ते किं त्वयुक्त
व्रतप्रसिद्धिविषयः संकल्पविशेषः॥ ॥स एव व्रतं॥ ॥न व्रतसंकल्पयेति त्यन्वय इति वा
च्यं॥ पाकपवति॥ दानं दद्यादिव प्रत्ययानुग्रहार्थं प्रयोगोस्त्वित्तिरिति तत्त्व्याः॥ तत्र प्र
कालमाह॥ ॥हेमाद्रौ गर्गः॥ अस्तंगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे॥ उद्याप
नमुपारंभं व्रतानां नैव कारयेत्॥ ॥तत्रैव वृद्धमनुबृहस्पतिः॥ ॥अग्न्याधा
नं प्रतिष्ठां च यज्ञदानव्रतानि च॥ मांगल्यमभिषेकं च मलमासे विवर्जयेत्॥ बा

लेवायदिवावृद्धेशुक्रेवास्तंगतेगुरौ॥मलमासइवैतानिवर्जयेद्देवदर्शनं॥लल्लः॥नी
चस्थेवक्रसंस्थेप्यतिचरणगतेबालवृद्धास्तगेवासन्यासोदेवयात्राव्रतनियमविधिः
कर्णवेधस्तुदीक्षा॥मौंजीबंधोथचूडापरिनयनविधिर्वास्तुदेवप्रतिष्ठा वर्ज्याःसद्भिः
प्रयत्नात्त्रिदशपतिगुरौसिंहराशिस्थितेच॥नीचस्थेमकरस्थःकल्पतरौदेवीपु
राणे॥सिंहसंस्थंगुरुंशुक्रंसर्वारंभेषुवर्जयेत्॥प्रारब्धंतत्रसिद्धेतमहाभयकरं
भवेत्॥पुत्रमित्रकलत्राणिहन्याच्छीघ्रंनसंशयः॥देवारामतडागेषुव्रतोद्यानगृ
हेषुच॥सिंहस्थंमकरस्थंचगुरुंयत्नेनवर्जयेत्॥वसिष्ठः॥सिंहस्थेतुमघासंस्थं
गुरुंयत्नेनवर्जयेत्॥अन्यत्रसिंहभागेतुसिंहस्थोपिनदुष्यति॥सिंहस्थगुरौवर्ज
नीयत्वंनर्मदोत्तरभागएव॥अन्यत्रतुसिंहांशकएववर्ज्यः॥तथाचमदनरत्नाधि
ध्टनकालविधाने॥सिंहस्थितःसुरगुरुर्यदिनर्मदायास्तंवर्जयेत्सकलक

व्रतार्क प० २

लकूर्मस्तु सौम्यभागे॥ विंध्यस्य दक्षिणदिशि प्रवदंति चार्याः सिंहांशके मृगगतपतनामवि
वर्जनीयं॥ सिंहांशस्तु पूर्वाफल्गुन्याः प्रथमः पादः॥ मृगपतौ मकरस्थे गुरौ गोदिशि
विशेषमाह[illegible]ः॥ नर्मदापूर्वभागे तु शोणस्योत्तरदक्षिणे॥ गंडक्याः पश्चि
मे भागे मकरस्थे गुरौ न दोषभाक्॥ केषांचिन्मते कर्तुकामानामन्येषां च व्रतानामगस्त्ये
दृश्ये प्रारंभनिषेधात्॥ हेमाद्रौ लौगाक्षिः॥ ॥अथ यानि काञ्चितपवित्रकमेघ
पूजादूर्वाष्टमीफलषष्ठीरूपकजागराणि॥ स्त्रीणां व्रतानि निरवकाशान्यपि
वार्षिकाणि कुर्यादगस्त्योदिते न शुभानि लिप्सारिति॥ अथ यानि काम्यव्रतवि
शेषः शिवशेषपवित्रकं॥ आषाढ्यामथ वामाघ्यां विहितं शिवपवित्रा
रोपणं॥ मेघपूजाव्रतविशेषः॥ दूर्वाष्टमी॥ भाद्रशुक्लाष्टमी॥ फल

श्री
२

विरुद्धकं भाद्रशुक्लचतुर्दश्यां पालीव्रतं कदलीव्रतपरनामकं ॥ जागरं आश्विनपौर्णमास्यां कोजा
गरव्रतं ॥ कार्तिकशुक्लचतुर्दश्यां विहितं जागरव्रतं वा ॥ वार्षिकाणीत्यत्र वर्षासु भूतानि वार्षिकाणु
णीत्येव व्युत्पत्तिर्न तु ॥ वर्षभावानीति तथा सति शरदादिग्रीष्मपर्यंतं अगस्त्योदयानुवृत्ते
स्तन्मध्ये विहितानां वासंत्रीव्रतानां सर्वथा नारंभ एवापद्येत इति ॥ अगस्त्योदयकालश्च द्वैवाद
शीये ॥ ॥ उदेति याम्यां हरिसंक्रमाद्रवेरेकाधिके विंशतिह्यगस्त्यः ॥ सप्तसप्तमेस्त व्रषसंक्रमा
त्प्रयाति गर्गादिभिरप्यमाणि स्मिन्व्रतारंभसमाप्त्योस्तिथिर्विनिष्टिं हेमाद्रौ मलव्रतः ॥
उदयस्यातिथिर्ग्राह्या न पूर्वेद्युः न मध्यभाक् ॥ सारंखडानव्रतानां स्यादारंभश्च समापनं ॥ ए
तद्व्यतिरिक्ताभरखंडायां प्रारंभमाहतेत्रवेवद्धवसिष्ठः ॥ खंडव्यापि मार्तंडा यद्यखंडाप्य
वेत्तिथिः ॥ व्रतप्रारंभणं तस्यामनस्तगुरुशुक्रयोः ॥ अनस्तमितगुरुशुक्रायां तिथौ व्रत
मारंभणीयमित्यर्थः ॥ रत्नमालायां ॥ ॥ सोमसौम्यगुरुशुक्रवासराः सर्वकर्मसु भ
वंति सिद्धिदाः ॥ भानुभौममंदवासरेषु तु प्रोक्तमेव खलु कर्मसिध्यति ॥ विरुद्धसंज्ञोऽह

येवयोगास्तेषामनिष्टःखलुपादआद्यः॥सवैधृतिस्तुव्यतिपातनामासर्वो
प्यरिष्टःपरिघस्यचाद्यं॥तिस्रस्तुयोगेप्रथमेत्यवज्रेव्याघातसंतेनवपंचशूले॥
३ गंडेत्वगंडेत्वषडेवताश्चःशुभेषुकार्येषुविवर्ज्जनीयाः॥ ॥ब्रह्मयामले॥दिन
भद्रायदारात्रौरात्रिभद्रायदादिवा॥तस्याज्याशुभकार्येषुप्राकुरेवंपुरा
तनाइति॥ ॥अथदेशांव्यासः॥सर्वेशैलोच्चयाःपुण्याःसागराःसरित
स्तथा॥अरण्यानिचपुण्यानिविशेषान्नैमिषंतथा॥ ॥देवीपुराणे॥दे
शोनदीगयाशैलंगंगानर्मदपुष्करं॥वाराणसीकुरुक्षेत्रंप्रयागंजंबुके
श्वरं॥केदारंवामपादंचकुडवंपुष्कराह्वयं॥सोमेश्वरंमहापुण्यंतथा श्री
चामरकंटकं॥कालंजरंतथाविंध्यंयत्रवासोगुहस्यच॥गुहःस्वामिका ३

तिक्रियः॥ ॥मनुः॥ सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं॥ तं ब्रह्मनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्ष
ते॥ यस्मिन्देशे य आचारः पारंपर्यक्रमागतः॥ वर्णानां सांतरालानां स सदाचार उच्य
ते॥ कुरुक्षेत्रं च मत्स्याश्च पांचालाः सुरसैनिकाः॥ एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनंत
रः॥ मत्स्या विराटाः॥ पांचालाः कान्यकुब्जाः॥ सुरसैनिका मथुरादेशाः॥ अनंतरः
समः॥ हिमवद्विंध्ययोर्मध्ये यत्प्राग्विनशनादपि॥ प्रत्यगेव प्रयागाच्च मध्यदेशः उ
दाहृतं॥ विनशनं कुरुक्षेत्रं॥ आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्॥ तयोरेवां
तरं गिर्योरार्यावर्त्तं विदुर्बुधाः॥ सिंधुर्नदी पश्चिमतीरस्थाश्च वक्ष्यत्यर्थमाह॥ कृष्ण
सारस्तु चरति मृगो यत्र स्वभावतः॥ स ज्ञेयो याज्ञियो देशो म्लेच्छदेशस्ततः परः॥
एतान्हि जातयो देशान्संश्रयेरन्प्रयत्नतः॥ ॥याज्ञवल्क्योपि॥ ॥यस्मिन्देशे मृ
गः कृष्णस्तस्मिन्धर्मान्निबोधमति॥ अधाधिकारिणा स्कांदे॥ निजवर्णाश्र

माचारः निरलसः शुद्धमानसः ॥ अलुब्धः सत्यवादी च सर्वभूतहिते रतः ॥ व्रतेष्वधिकृतं
राजन्नन्यथा विफलः श्रमः ॥ श्रद्धावान्पापभीरुश्च मददंभविवर्जितः ॥ पूर्व
न्निश्रमाश्रित्य सद्यथावत्कर्मकारकः ॥ अवेदनिंदको धीमानधिकारी व्रतादिषु ॥
निजवर्णाश्रमाचार इत्यनेन चतुर्णामधिकारो गम्यते ॥ अत एव कौर्मे ॥ ब्राह्मणाः
क्षत्रिया वैश्याः शूद्राश्चैव द्विजोत्तम ॥ अर्चयंति महादेवं यज्ञदानसमाधि
भिः ॥ व्रतोपवासनियमैर्होमस्वाध्यायतर्पणैः ॥ तेषां वै विविधं स्थानं सायुज्यं सामी
प्यं चाति दुर्लभं ॥ सलोकतां च सारूप्यं जायते तत्प्रसादतः ॥ देवलोऽपि ॥ व्र
तोपवासनियमैः शरीरोत्तापनैस्तथा ॥ वर्णाः सर्वेऽपि मुच्यंते पातकेभ्यो न सं
शयः ॥ अधिकारिविशेषणस्य पुंस्त्वस्याविवक्षितत्वात् ॥ स्त्रीणामप्यधि
कारः ॥ भारते ॥ मामुपाश्रित्य कौंतेय येऽपि स्युः पापयोनयः ॥ स्त्रियो वैश्या

स्तथाम्लेछास्तेपियांतिपरांगतिं॥ इति॥ क्वचित्तुम्लेछानामप्यधिकारोहेमाद्रौदे
विपुराणे॥ स्नानैश्चमुदितैर्हृष्टैः ब्राह्मणैःक्षत्रियैर्नृपैः॥ वैश्यैःशूद्रैश्च भक्ति
युक्तैर्म्लेछैरन्यैश्चमानवैः॥ स्त्रीभिश्चकुरुशार्दूल तद्विधानमिदंशृणु॥ वैश्य
शूद्रयोस्तुद्विरात्राधिकारोपवासेनभवति॥ वैश्याःशूद्राश्चमोहादुपवासं ये
प्रकुर्वते॥ त्रिरात्रंपंचरात्रंवातेषांपुष्टिर्नविद्यते इति॥ प्रास्त्वालिखितनि
षेधात्॥ पुष्टिःफलं॥ सभर्तृकाणांभर्त्राज्ञांविनानाधिकारः॥ तथाहमदनरत्ने
यमार्कंडेयपुराणे॥ यानारीत्वननुज्ञाताभर्त्रापित्रासुतेनवा॥ निःफलंतुभवेत्त
स्यायत्करोतिव्रतादिकं॥ भर्त्राज्ञयानुसर्वव्रतेष्वधिकारः॥ भार्याभर्तुर्मतेनैवव्र
तादीनाचरेत्तुधिक्त्सेदितिकात्यायनोक्तेः॥ तथाच॥ पत्यौजीवतियानारीउपवा
सव्रतंचरेत्॥ आयुष्यंहरतेभर्तुःसानारीनरकंव्रजेत्॥ इतिविष्णुवचनात्॥

व्र० कौप

त्र

५ नभर्त्तुरनुज्ञापरं॥ यत्तु कश्चित्॥ नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं॥ भ
र्त्तुशुश्रूषयैवैता लोकानिष्टान्व्रजंति ताः॥ यद्देवेभ्यो यज्ञे पित्र्यादिकेभ्यः कुर्यात्ऽभ्य
र्चनसत्क्रियां च॥ तस्यैव सा फलं नान्या विज्ञा नारी भुंक्ते भर्त्तृशुश्रूषयैवेति स्कांदा
त्॥ सभर्तृकाणामेकादश्यादुपवासादावनधिकार इति तन्न॥ तस्यापि पृथक्
स्वातंत्र्येण भर्त्तुरनुज्ञापरत्वात्॥ अतएव व्यासः॥ ॥कामं भर्त्तुरनुज्ञाता व्रतादि
ष्वधिकारिणीति॥ ॥शंखोपि॥ ॥कामं भर्त्तुरनुज्ञया व्रतोपवासनियमाः स्त्री
धर्मा इति॥ न चानुज्ञया व्रतेष्विव यज्ञेपि पृथगधिकारापत्तिरिति वाच्यं॥ तस्याश्च
त्यध्ययनजन्यताऽभावेनापत्न्या सा वात्॥ यद्वा स्कांदस्य॥ भर्त्तृशुश्रूषया लोकव्
त्वेनाप्युपपन्नत्वादिति॥ न च भर्त्रनुज्ञैव वाधिकारसिद्धौ विधवायां॥ व्रतानधि ५ श्री
कारापत्तिरिति वाच्यं॥ या नारी त्वननुज्ञाता भर्त्रा पित्रा सुतेन वा॥ विफलं
तद्भवेत्तस्या यत्करोत्यौर्ध्वदैहिकमिति मार्कंडेयोक्तेः॥ पित्राद्याज्ञया तस्या

५

धिकार इति हेमाद्रिः ॥ स्त्रीणां व्रतग्रहणे विशेषो हेमाद्रौ हरिवंशे ॥ स्नानं च
कार्यं शिरसः स्नातः फलमवाप्नुयात् ॥ स्नात्वा स्त्री प्रातरुत्थाय पतिं विज्ञा
पयेत्सती ॥ अथ व्रतधर्माः ॥ ॥ व्रतसंकल्पविधिर्भारते ॥ ॥ गृहीत्वौदुंब
रं पात्रं वारिपूर्णमुदङ्मुखः ॥ उपविष्टं तु गृह्णीयाद्यद्वा संकल्पयेद्बुधः ॥ औ
दुंबरं ताम्रमयं ॥ औदुंबरं स्मृतं ताम्रमिति विश्वोक्तेः ॥ यद्वान्यव्रतादि संकल्प
ल्पयेदिति कल्पतरुः ॥ श्रीदत्तस्तु कल्पतरुमते वाकारश्चार्थे इति नियमार्थः ॥
मस्तु नक्तादि कर्तुमिच्छं तु दर्पिष्ठक्ता विधिनैव गृह्णीयादिति तन्मतं परिसु
ष्ट्या वाकारस्योपवासपदस्य चैवेय्यर्थापत्तेः यत्संकल्पयेन्न गृह्णीयादिति
नेवोपपन्नेति स्यद्दूषयत् ॥ ताम्रपात्राद्यभावे हस्तेनापि जलं गृहीत्वा संक
ल्पयेदिति त्सुतं ॥ अत एवानंतफलदा यद्बोध्यं धारयेदिति पाठः ॥ मदनर

व्रतार्कप०

६

त्नेदेवलवाक्येतुयथासंकल्पमेदितिपाठः॥यथाक्रमंफलमुद्दिष्टेदित्यर्थः॥अत
एवमार्कंडेयः॥संकल्पंचयथाकुर्यात्स्नानदानव्रतादिके॥अनंतरंकृत्यमाहमदनर
त्नेदेवलः॥अभुक्त्वाप्रातराहारंस्नात्वाचम्यसमाहितः॥सूर्यायदेवताभ्यश्च
निवेद्यव्रतमाचरेत्॥अत्रप्रातर्व्रतमाचरेदित्येवान्वयः॥प्रधानक्रियान्वयस्याभ्य
र्हितत्वात्॥अभुक्त्वेतितुअज्ञातस्याप्यनुज्ञातेष्वादिभक्षणापवादः॥केचित्तु
व्रतदिनेप्रातराहारमभुक्त्वाव्रतमाचरेदित्याहुः॥तत्रउपवासव्रतोवायमित्यनेन
वाभुक्त्वव्रतोधिकारस्यप्राप्तत्वादेतस्यैवपर्यायापत्तेः॥अन्येतुपूर्वदिनेप्रात
र्दिनेप्रातराहारमभुक्त्वाअर्घ्यादिकंसंकल्पंकृत्वाचम्यव्रतादिकंकुर्या[illegible]मित्याहुः॥
परेसर्वत्रपूर्वेद्युरेवसायंसंध्योत्तरंव्रतंग्राह्यंवारव्रतादौबहुशस्तथादृष्ट
त्वात्॥प्रातःस्नात्वेतिचान्वयइत्याहुः॥सामान्यधर्माहेमाद्रौभविष्ये॥क्षमा

श्री

६

सत्यंदयादानंशौचमिंद्रियनिग्रहः॥देवपूजाग्निहवनंसंतोषस्तेयवर्जनं॥सर्वव्रतेष्वयं
धर्मःसामान्योदशधास्थितः॥देवपूजायदैवत्यंव्रतस्यपूजा॥अग्निहवनंपूज्यदेवतोद्देशेनहो
मः॥अक्रमातूऽतज्ञसप्तमीव्रतेसूर्यपूजाग्निहवनं॥नवमीव्रतेदुर्गापूजा॥अनुक्तदेवता
व्रतेइष्टदेवतापूजाहवनंव्याहृतिहोमइतिकेचित्॥अत्रक्षमादीनांस्वतंत्रतया॥चतुर्वर्ग
साधनत्वेनविहितानांव्रतांगतयाविधानं॥खादिरंवीर्यकामस्ययूपंकुर्यादितिवत्संयोग
पृथक्त्वादुपपन्नमितिहेमाद्रिः॥सर्वव्रतेष्वित्यत्रसर्वव्रतपदंभविष्यपुराणीयं॥सर्वव्रतप
रमतोव्रतांतरेविध्यंतरसत्वएवहोमादिनामंगत्वंनान्यथा॥अतएवैकादशीव्रतादौ
शिष्टानांहोमाद्यनाचरणमितिकेचित्॥वस्तुतस्तुयेष्वेवपुराणांतरोक्तव्रतेषुहोमादिवि
धिरस्तितद्विषयमेवसर्वपदमन्यथातदितरपरत्वेनसंकोचापत्तेरितिपृथ्वीचंद्रोदये
ग्निपुराणेस्नात्वाव्रतवतासर्वव्रतेषुव्रतमूर्त्तयः॥पूज्याःसुवर्णामुख्याभप्याशक्तौ

व्रतार्कप०
७

वैभ्रस्त्रिशाप्यिनाजपोहोमस्त्रसामास्यंव्रतानांलेदानमेवच॥चतुर्विंशतिद्वादशावापंचरात्रय
एवंवाविप्रान्संपूज्ययथाशक्त्यादक्षिणांव्रतमूर्तयस्तद्देवताप्रतिमाः॥ देवलः॥ब्रह्म
चर्यमहिंसावसत्यमामिषवर्जनं॥व्रतेष्वेतानिचत्वारिचरितव्यानिनित्यशः॥स्त्रीणां
तुप्रेक्षणास्पर्शात्ताभिःसंकथनादपि॥विपद्यतेब्रह्मचर्यंनचतुसंगमात्॥स्वदारेषु
संगमादितिकल्पविसारः॥आमिषंमांसं॥आमिषंअतिपानीयंगोवर्ज्यक्षीरमामिषं॥मसूरमा
मिषंसस्येफलेजंबीरमामिषं॥आमिषंशुक्लिकाचूर्णमारनालंतथामिषं॥इतिस्मृत्यंत
रोक्तंवा॥व्रताद्यारंभेवृद्धिश्राद्धंकार्यं॥नदाहशान्तोतपः॥ ॥नतिषिद्धातुपितृश्राद्धंक
र्मकिंचिसमारभेत्॥गृहीतव्रतानाचरणेमदनरत्नेछागलेयः॥पूर्वंव्रतंगृहीत्वायोना
चरेत्काममोहितः॥जीवन्भवतिचांडालोमृतःश्वैवाभिजायते॥काममोहितविशे
षणाद्व्याध्यादिनानाचरणेनदोषः॥ ॥तथाचहेमाद्रौस्कांदे॥ ॥सर्वभूतभयंवै

श्री
७

प्रमादोगुरुज्ञासनं॥अव्रतघ्नानिपच्यंतेसकृदेतानिझ॥स्नातः॥सर्वेभ्योभूतेभ्यःसका
शाद्भूतकर्तुर्भयमितिहेमाद्रौमदनरत्नेतुसर्वभूतभयंव्याधिअरिपरिलाव्याख्या
तः॥सर्वभूतभयंभूतभ्यव्यभ्योभयतेनसर्पाभयाद्भूतांगवैकल्पंतेनव्रतहानिर्भवतीति
स्पर्धः॥गुरुज्ञासनंगुरोराज्ञासकृदुल्लंघ्या॥सकृत्यागेप्रायश्चित्तं॥ ॥तच्चोक्तंस्कां
दगारुड्ययोः॥ ॥क्रोधात्प्रमादाल्लोभाद्वाव्रतभंगोभवेद्यदि॥दिनत्रयंनभुंजीतमुं
डनंशिरसोथवा॥नवात्रप्रायश्चित्तोक्तेरस्तिकालव्रतानानादरणमितिवाच्यं॥प्रा
यश्चित्तमिदंकृत्वापुनरेवव्रतीभवेत्॥इतिस्कांदात्॥ ॥अथोपवासधर्माः॥ ॥तत्रोप
वासस्वरूपंकात्यायनवृद्धवसिष्ठाभ्यांदर्शितं॥उपावृत्तस्यपापेभ्योयस्तुवा
सोगुणैःसह॥उपवासःसविज्ञेयःसर्वभोगविवर्जितः॥गुरुतज्जपनध्यानंत
त्कथाश्रवणादयः॥उपवासकृतामेतेगुणाःप्रोक्तामनीषिभिः॥दयासर्वभूते

व्र० तार्क०

८

षु क्षांतिरनसूयाशौचमनायासो मंगलमकार्पण्यमनीस्पृहेति सादि विष्णुधर्मोत्तरे गौतमा
दिप्रतिपादितैः॥ नच्छेदेनोपवास्यादेवताव्रते देवतावाएवं च पापानि वर्ज्यगुणानुष्ठानेन च
सहितो निराहारस्य वा सोऽवस्थानमनुपवास इत्युक्तं भवति एवं च फलसाधनस्योपवास
स्य स्वरूपमुक्तं॥ उपवासपदार्थास्तु स्मृतिपुराणव्यवहारे रूढ्या निराहारावस्थावस्थानमा
त्रं॥ वृद्धवसिष्ठः॥ ॥ उपवासे तथा श्राद्धे न कुर्याद्दंतधावनं॥ कृच्छ्रे नैतिदोषः॥ अत एव
तस्मिन् दिने निंदितो नां काष्ठसंयोगो हंति सप्तकुलानि वै इति वाक्यदोषाद्धि ध्येयं॥ निषे
धस्यापि विशेषपरतायुक्तं वचनेन॥ आलेवा निषेधे वा काष्ठानां दंतधावने॥ पर्णादीना
विशुद्धेन जिह्वोल्लेखः सदेवहि॥ इति पैठीनसिवचनात्॥ आलाभे दंतकाष्ठानां निषिद्धा
यां तथा तिथौ॥ अपां द्वादशगंडूषैर्विदध्याद्दंतधावनं॥ इति व्यासवचनात्॥ देवलः॥ ॥ अ
सकृज्जलपानाच्च सकृत्तांबूलचर्वणात्॥ उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्॥
अत्राशक्तौ तु नैव जलपानमभ्यनुज्ञातं॥ असकृदंबुपानेन नोपवासः प्रणश्यति॥

श्री

८

असत्येजलपानात्प्राणात्ययेविष्णुधर्मे॥असकृज्जलपानंचदिवास्वापंचमैथुनं॥
तांबूलचर्वणंस्वापंवर्जयेद्व्रतवासरे॥असकृदुत्म्यासकृज्जलपानेनदोषःअत्र॥
पारणांतंव्रतंज्ञेयंव्रतांतेविप्रभोजनं॥आसमाप्तेव्रतेपूर्वंकुर्यान्नैवव्रतांतरमि
ति॥तस्यापिव्रतवासरत्वान्मांसनिषेधः॥पारणादिनेऽप्येवंतुपवासेप्रसक्त्यभा
वात्॥ ॥अतएवनिर्णयामृतेव्यासः॥वर्जयेत्पारणेमांसंव्रताहेप्यौषधंसदा॥
अष्टौतान्यव्रतघ्नानिआपोमूलंफलंपयः॥हविर्ब्राह्मणकाम्यावगुरोर्वचन
मौषधमितिस्कांदवचसा॥प्रसक्तमौषधरूपमपिमांसंव्रताहेवर्जयेदित्य
र्थः॥विष्णुरहस्ये॥स्मृत्वालोकनगंधादिस्वादनंपरिकीर्तनं॥अन्नस्यव
र्जयेत्सर्वंग्रासानांचाभिकांक्षिणं॥गात्राभ्यंगंशिरोभ्यंगंतांबूलंचानुले
पनं॥व्रतस्थोवर्जयेत्सर्वंयच्चान्यद्बलरागकृत्॥इतिहारीतः॥पतितपा
खंडादीनास्तिकादिसंभाषणान्ततांबूलादिकमुपवासादिषुवर्जयेदिति॥

अन्नादिपदेनयत्पुरुषार्थतयासर्वदानिषिद्धंतदपिक्रत्वर्थतयासंगृह्यते॥अतए
वव्रताधिकारेसुमंतुः॥ ॥विहितस्याननुष्ठानमिंद्रियाणामनिग्रहः॥ निषिद्धसे
वनंनित्यंवर्जनीयंप्रयत्नतः॥पतितादेर्दर्शनेतुविष्णुः॥पस्यावलोकनेसूर्यंपश्येत
मतिमान्नरस्पर्शादौविष्णुधर्मे॥ ॥संस्पर्शेचततःस्नात्वाशुचिरादित्यदर्शनात्॥
समाप्यतांशुचिर्यदर्वित्तंयदच्युतंबुधः॥ ॥योगयाज्ञवल्क्यः॥ ॥यदिवाग्यम
लोपःस्याद्व्रतदानक्रियादिषु॥व्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययं॥यमः॥
मानसेनियमेलुप्तेस्मरेद्विष्णुमनामयमिति॥ ॥बृहन्नारदीये॥ ॥रजस्व
लांचचांडालंमहापातकिनंतथा॥सूतिकांपतितंचैवउच्छिष्टंरजकादिकं॥
व्रतादिमध्येश्रृणुयाद्घोषांध्वनिमुत्तमं॥अष्टोत्तरसहस्रंतुजपेद्वेद
मातरं॥वेदमातागायत्रीमिताक्षरायांदक्षः॥ ॥संध्याहीनोऽशुचिर्नि
त्यमनर्हःसर्वकर्मसु॥यदन्यत्कुरुतेकिंचिन्नतस्यफलमश्नुते॥अत्र

प्रातःसंध्यैवांगमिति केचित्॥ ॥नातवर्णैगास्तु॥अविशेषात्तत्संध्योत्तर
भाविनीकर्म॥द्वौसांगमितियुक्तमाहुः॥ प्राज्ञाः॥कालानुसरणादिकंकल्प
ध्यां स्तुप्रातःसंध्यांकृत्वैवकार्यः प्रातःसंध्यांबुधाःकृत्वासंकल्प्यतआचरेदिति॥
गौडनिबंधधृतंस्मृते॥ ॥मार्कंडेयपुराणे॥ ॥सूर्योदयंविनानैवव्रत
दानादिकाःक्रमइति॥क्रमइतिक्रमउपक्रमः॥स्नानदानादिकाःक्रिया
सूर्योदयइविनउषःकालोद्रास्यतेतंविनाशौस्नानादिकंनकार्यमि
कल्पतरुच्छंदोगपरिशिष्टे॥सदोपवीतिनाभाव्यंसदाबद्धशिखेनच॥विशि
खोप्युपवीतश्चयत्करोतिनतत्कृतं॥पित्र्यमंत्रानुद्रवणआत्मालंभेअवेक्ष
णे॥अधोवायुसमुत्सर्गेप्रहासेनृतभाषणे॥मार्जारमूषकस्पर्शेआक्रुष्टे
क्रोधसंभवे॥निमित्तेष्वेषुसर्वत्रकर्मकुर्वन्नपःस्पृशेत्॥ ॥मार्कंडेयपु

व्रतार्कप० १०

राणे॥ ॥शिरःस्नानमत्रकुर्वीतदैवंपित्र्यमथापिवा॥ ॥वाराहपुराणे॥ ॥स्ना
नंसंध्यातर्पणादिजपहोमामरार्चनं॥ उपवासव्रताकार्यंसावयंकालवर्तीविना॥
भगवद्गीतायां॥ ॥तस्मादोमित्युदाहृत्ययज्ञदानतपःक्रियाः॥ प्रवर्त्तंतेवि
धानोक्ताःसततंब्रह्मवादिनां॥ ॥आपस्तंब॥ ॥त्रिपात्रस्तुप्रयोक्तव्यक
र्मारंभेषुसर्वदा॥ ॥इतिविस्तृतावियंसामान्यपरिभाषाज्ञातानवरणकृत
आचारमयूखेद्रष्टव्या॥ ॥अत्रविस्तीर्णंविशेषोहेमाद्रौपाद्मे॥ ॥
गर्भिणीसूतिकादिश्चकुमारीवाथरोगिणी॥ यदाशुद्धातदान्येनका
रयेत्प्रयतास्वयं॥ प्रयताशुद्धास्वयंकुर्यादित्यर्थः॥ ॥पुंसोप्येषवि
धिर्लिंगस्याविवक्षितत्वादितिहेमाद्रिः॥ ॥स्त्रीरजोदर्शनेपिकार्यं श्री १०
तथाचसत्यव्रतः॥ प्रारब्धदीर्घतपसांनारीणांयद्रजोभवेत्॥ नतत्र

व्रतस्यस्यादुपरोधःकथंचन॥ व्रतस्यउपवासेप्यर्थः॥ पत्न्यादिकंत्वन्येनकारयेत्॥
सूतकेप्यारंभएव॥ तथावतत्रैव॥ पूर्वसंकल्पितंयच्चव्रतंसुनियतव्रतैः॥त
त्कर्तव्यंनरैःशुद्धंनोदशौचेनविवर्जितं॥अन्येनकारयेदित्यपेक्षायांतत्रैवपै
ठीनसिः॥भार्यायैतुव्रतंकुर्याद्भार्यायाश्चपतिव्रतं॥असामर्थ्येपतिस्ता
भ्यांव्रतभंगोनजायते॥तत्रैववायुपुराणे॥ ॥उपवासेत्वशक्तस्यआहि
ताग्निरथापिवा॥पुत्रान्वाकारयेदन्यान्ब्राह्मणान्वापिकारयेत्॥उपवासं
प्रकुर्वाणःपुण्यंशतगुणंभवेत्॥नारीवपतिमुद्दिश्यएकाभपोषिता॥पुत्रं
शतगुणंप्राप्यादित्याहगालवोमुनिः॥मातामहादिमुद्दिश्यएकादश्यामुपो
षणे॥कृतेतुलभेत्फलंविप्रासमग्रंफलमाप्नुयुः॥एतेवप्रतिनिधयोनका
म्येतथावश्यकेनः॥ काम्येप्रतिनिधिर्नास्तिनित्येनैमित्तिकेपिच॥काम्येसु

पक्षमादूर्ध्वंकेचित्प्रतिनिधिंविदुः॥नस्यात्प्रतिनिधिर्मंत्रस्वामिदेवाग्निकर्म
सु॥सदेशकालयोनाशेअग्निसेवसा॥नापिप्रतिनिधातव्यंनिषिद्धंवस्तु
कुत्रचित्॥अथव्रतहविष्याणिहेमाद्रौछंदोगपरिशिष्टेशांखायनं॥ ॥ ह
विष्येषुयवामुख्यास्तदनुव्रीहयस्मृताः॥माषकोद्रवगौरादीन्सर्वाभा
वेपिवर्जयेत्॥ ॥तत्रैवअग्निपुराणे॥ ॥व्रीहिषष्टिकमुद्गाश्चकलायाःसलि
लंपयः॥श्यामाकाश्चैवनीवारागोधूमाद्याःव्रतेहिताः॥कूष्मांडालाबुवार्ताकंता
कपालक्यपौत्तिकास्त्यजेत्॥चरुभैक्ष्यंसक्तुकणाःशाकंदधिघृतंमधु॥श्या
माकाःशालिनीवाराःपावकंमूलतंदुलं॥हविष्यव्रतनक्तादावग्निकार्यादि
केहितं॥मधुमांसंविहायान्यद्व्रतेवाहितमीरितं॥ ॥पालक्यौशाकविशेषः॥ ॥
योऽइतिप्रसिद्धः॥शाकइतिकेचित्॥जोत्सिकाकोशातकी॥तत्रैवभविष्येहेमं

तिकंस्विलास्विन्नंधान्यंमुद्गायवाःस्तिलाः॥कलायकंगुनीवारावास्तुकंहैलमोचि
का॥षष्टिकाकालशाकंचमूलकंकेमुकेतरत्॥कंदःसैंधवसामुद्रेगव्येचदधिस
र्पिषी॥पयोनुध्धृतसारंचपनसाम्रहरीतकी॥पिप्पलीजीरकंचैवनागरंगंचति
तिणी॥कदलीलवलीधात्रीफलान्यगुडमैक्षवं॥अतैलपक्वंमुनयोहविष्या
न्नंप्रचक्षते॥लवणेमधुसर्पिषीतिक्वचित्पाठः॥हैमंतिकंधान्यंकलमान्नद
पिसितंश्वेतआस्विन्नंचहविष्यंकलायाःसतीनापरपर्यायाःमटरइतिप्रसिद्धाः॥
वाटाणेइतिमहाराष्ट्रभाषयाप्रसिद्धंधान्यं॥वास्तुवथुसतिरव्यःशाकः॥हिलंमु
क्रमोचयती॥निक्षीरस्वांम्बुजःशुक्कासारोहिलसोइतिप्रसिद्धःशाकः॥नजाग्रगौ
उडहादेशेचेतिप्रसिद्धःकालशाकमुत्तरदेशेकालिकेतिप्रसिद्धं॥कमुकंकेसु
त्राइतिपूर्वदेशेप्रसिद्धंनागरंगनारिंगं॥ऐरावतंनागरंनोनादेयीफलमिज
बुकेइत्यमरात्॥नागरंचैवेतिपाठेनागरंसुंठी॥लवलीरायआवळे॥इति

माराष्ट्रभाषयोश्च मानं फलं हरफारेवडीति मध्यदेशभाषया॥ अतैलपक्वमिश्रेतत्कथि
तं हविष्याणामेव विशेषणमनुः मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतं॥ अक्षार
लवणं चैव प्रकृत्या हविरुच्यते॥ अनुपस्कृतमपक्वं॥ ॥अथ व्रताद्युपयुक्तानि वस्तू
नि॥ ॥तत्र पंचरत्नानि आदित्यपुराणे॥ ॥सुवर्णं राजतं मुक्ता वैडूर्यं च प्रवा
लकं॥ रत्नपंचकमाख्यातं शेषं वस्तु ब्रवीम्यहं॥ कनकं कुलिशं नीलं पद्मरागं च मौ
क्तिकं॥ एतानि पंचरत्नानि रत्नशास्त्रविदो विदुः॥ इति समयप्रदीप धृतकालि
कापुराणोक्तानि वा॥ कुलिशं हीरकं॥ अभावे सर्वरत्नानां हेम सर्वत्र योजयेत्॥ विष्णुधर्मो मं
त्तरे॥ मुक्ताफलं हिरण्यं च वैडूर्यं पद्मरागकं॥ पुष्परागं च गोमेदं नीलं गारुत्मकं तथा॥ प्रवा
लयुक्तान्युक्तानि महारत्नानि वै नव॥ ॥हेमाद्रौ ब्रह्माण्डपुराणे॥ ॥अश्वत्थोदुंबरप्लक्षचूत
न्यग्रोधपल्लवाः॥ पंचभंगा इति प्रोक्ताः सर्वकर्मसु शोभनाः॥ पंचगव्याः पंचपल्लवाः॥ श्री
पंचगव्यं तत्रैव स्कांदे॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिर्यथाक्रमं॥ विष्णुधर्मः॥ गोमुत्र १२
भागवतस्त्वर्द्धं सकृत्क्षीरस्य च त्रयं॥ दध्नो घृतस्यैकं अकुशावारि गोमुत्रादिपरि

माणंतालवरणकुलप्रायश्चिनमयूरवेज्ञेयं॥ विष्णुधर्मे॥ ॥गायत्र्यादायगो
मुत्रंगंधद्वारेतिगोमयं॥ आप्यायस्वेतिक्षीरंदधिक्राव्णेतिवैदधि॥ तेजोसिशु
क्रमित्याज्यंदेवस्यत्वाकुशोदकं॥ एभिस्तुपंचभिर्युक्तंपंचगव्यंप्रचक्षते॥ पंचामृ
तंहेमाद्रौविष्णुधर्मे॥ ॥पंचामृतंदधिक्षीरंसितामधुघृतंनय॥ मदनरत्नेकात्या
यनः॥ आज्यंक्षीरंमधुस्तथा॥ मधुरत्रयमुच्यते॥ तत्रैवभविष्ये॥ मधुरोम्ल
श्चलवणाःकषायाःतिक्तएवच॥ कटुकश्चेतिराजेंद्ररसषट्कमुदाहृतं॥ ह
चतुःसमंगारुडे॥ कस्तूरिकायाद्वौभागौचत्वारश्चंदनस्यच॥ कुंकुमस्यत्रयः
श्चैकंशशिनस्याच्चतुःसमं॥ शशीकर्पूरः॥ कर्पूरंचद्वयंकुर्यात्कुंकुमंचसमांशकं॥ श
सर्वगंधमितिप्रोक्तंसमस्तसुरवल्लभं॥ दर्पः॥ कस्तूरीमगरश्चैवकर्पूरंचंद
नंतथा॥ कंकोलंचभवेदेभिःपंचभिर्यक्षकर्दमः॥ सर्वौषधी॥ कुष्ठंमांसी

व्रतार्कप० हरिद्रेद्वेसुराशैलेयचंदनं॥ वचाचंपकमुस्तंचसर्वौषध्योदशस्मृताः॥पाद्मे॥
१३ इक्षवःस्तणराजंचनिष्पावाजातिधान्यकं॥आपःक्षीरकुङ्कुमाग्राणि ८ द्
धान्य[illegible]तिलास्तथा॥यवाःसिद्धार्थकाश्चेति[illegible]ष्टांगःप्रकीर्तिताः॥
पंचरात्र॥रजांसिपंचवर्णानिमंडलार्थंहिकारयेत्॥शालितंडुलचूर्णं
व नष्कुकंवायवसंभवं॥रक्तंकुंकुमसिंदूरंगैरिकादिसमुद्भवं॥हरितालोद्भ
वंबीजंरजनीसंभवंतथा॥कृष्णंदग्धयवैर्हरितपीतंकृष्णमिश्रं॥रजनी
हरिद्राकौतुकसंज्ञानिभविष्ये॥दूर्वायवांकुरश्चैववालकश्चूतपल्लवाः॥
हरिद्राद्वयसिद्धार्थशिखिपत्रोरगेलवः॥कंकणौषधयश्चैताःकौतुकाः श्री
ख्यातवस्मृताः॥ ॥सप्तमृदोमास्ये॥ ॥गजाश्वरथ्यावल्मीकसं १३
गमाहृदगोकुलात्॥मृदमानीयकुंभेषुप्रक्षिपेज्ज्वरातथा॥गोकू

आवधिसलवस्त्रेणसहाष्टोमन्दो भवेत्तिहेमाद्रौ भविष्ये॥ ॥सुवर्णरजतंता
म्रमारकूटंतथैवच॥ लोहंत्रपुस्तथासीसंधातवःसप्तकीर्त्तिताः॥ आरकूटंपि
त्तलं॥तंत्रेवषट्त्रिंशन्मतं॥ यवगोधूमधान्यानितिलाःकंगुस्तथैवच॥
श्यामाकंचीनकंचैवसप्तधान्यमुदाहृतं॥ ॥सप्तधान्यानिमार्कंडेयपुराणे॥ ॥
व्रीहयश्चयवाश्चैव गोधूमाकंगुलास्तिलाः॥ प्रियंगवःकोविदाराःकोरदूषाः
सचीनकाः॥ माषमुद्गामसूराश्चनिष्पावाःसकुलित्थकाः॥ आढक्याश्चण
काश्चैवशणाःसप्तदशस्मृताः॥ कोरदूषाःकोद्रवाः॥ सतीनकाः कलापा॥
मटरइतिप्रसिद्धः॥ तान्यष्टादश॥ निस्कांदे॥ यवगोधूमाःसतीनकाःकंगु
कुलित्थकाः॥ माषामुद्गामसूराश्चनिष्पावाःश्यामसर्षपाः॥ गवेधकाश्च
नीवारोआढक्योथसतीनकाः॥ चणकाश्चिनकाश्चैवधान्यान्यष्टादशै
वतु॥ ॥हेमाद्रौक्षीरस्वामी॥ ॥मूलपत्रकरीराग्रफलकांडाधिरूढकाः॥

त्वक्पुष्पंकवकंचेतिशाकंदशविधंस्मृतं॥करीरंवंशांकुरः॥अग्रंपल्लवः॥कांडंनालं॥
कवकंछत्राकं॥कलशायुक्तानिविष्णुधर्मे॥हेमराजतताम्राश्ममृन्मयालवण॥
न्विता॥यात्रोद्वाहप्रतिष्ठादौकुंभास्युरभिषेचने॥पंचाशांगुलवैपुल्याउत्
त्सेधषोडशांगुलाः॥द्वादशांगुलमूलास्युर्मुखमष्टांगुलंभवेत्॥
पंचवक्त्राशाश्चपंचाशाः॥आशादशपंचाधिकशतमंगुलानिवैपुल्यइत्यर्थः॥
इतितालवरणाः॥केचित्तुपंचाशदंगुलवैपुल्यमित्यर्थइत्याहुः॥ ॥प्रति
माद्यव्यतत्परिमाणंहेमाद्रौभविष्ये॥ ॥अनुकल्पव्यतत्संख्यादेवताप्रति
मान्येप॥सौवर्णीराजतीताम्रीवार्क्षाजामार्त्तिकीतथा॥चित्रजापिष्टलेपा
स्थानिजवित्तानुरूपतः॥आमाषात्पलपर्यंताकर्तव्याशाठ्यवर्जितैः॥अं
गुष्ठपर्वादारभ्यवितस्तियावदेवकारयेत्॥ ॥मात्स्येतुविशेषः॥ ॥अंगुष्ठप
र्वादारभ्यवितस्तिर्यावदेवतु॥गृहेतुप्रतिमाकार्यानाधिकाशस्यते॥

बुधैः॥ आषोडशात्तु प्राङ्क्षेसादे कर्त्तव्यानाधिकाततः॥ इत्याधिकं कल्पत
रौप्रतिष्ठाकांडे ज्ञेयं॥ तथा॥ अनुक्तसंख्याप्यत्र स्याच्छत मष्टोत्तरस्मृतं॥
मात्स्ये॥ होमोग्रहादिपूजायां शतमष्टोत्तरं भवेत्॥ अष्टाविंशतिरष्टौवायथाश
क्ति विधायते॥ ॥मदनरत्नेप्यत्र॥ ॥यथोक्तवस्तसंपत्तौ॥ग्राह्यंतदनुकारि
यत्॥ यवानामिवगोधूमा व्रीहीणामिव शालयः॥ आज्यंद्रव्यमनादेशेजुहोति
षुविधियते॥ मंत्रस्य देवतायाश्च प्रजापतिरितिस्थितिः॥ मंत्रस्य देवताया
श्च प्रजापतिरितिस्थितिः॥ मंत्रस्य देवतायाश्च विधाने प्रजापतिर्देवता समस्तव्या
हृतिर्मंत्रः॥ स्मृत्यंतरोपिनव्याहृत्या समस्तयुत इति गारुडे॥ ॥प्रणवादिनमोंत
चचतुर्थ्यंतसन्तमदेवतायाः स्वकं नाममूलमंत्रः प्रकीर्तितः॥ द्रव्याभावेप्रति
निधिः॥ दध्यलाभेपयः कार्यं मध्वलाभे तथागुडः॥ घृतप्रतिनिधिः का
र्यःपयोवादधिवान्प॥ दुग्धाभावेकाशः॥ सर्वाभावेयवाः॥ आज्यहोमेषु
सर्वेषु गव्यमेवप्रवेत्ततः॥ तदलाभेमहिष्यास्तु आज्यमाविकमेवतु॥ तद

भावेतुतैलंस्यात्तदलाभेतुजातिलं॥तदभावेतुकौसुंभंतदभावेतुसार्षपं॥ अथप
वित्रं॥ ॥अनंतगर्भितंसाग्रंकौशंद्विदलमेवच॥प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकु
त्रचित्॥ ॥अथधूपाः॥ ॥पालाशाश्वत्थखदिरवटोदुंबरएवच॥अथधूपाः॥
अगरुश्चंदनमुस्तासिह्लाकंचषणंतथा॥समभागंतुकर्त्तव्यंधूपोयममृताह्व
यं॥ सिह्लाद्युतिप्रसिद्धं॥चषणंकस्तूरी॥षड्भागकुष्ठंद्विगुणोगुडश्चलाक्षा
त्रयंपंचनखस्यभागं॥हरीतकीसर्जरसः समांसीभागैकमेकंत्रिवलंशिला
त्तां॥एतस्यचलारिपुरस्यचैकोधूपोदशांगकथितोमुनींद्रैः॥सर्जरसश्चरा
ळ॥मांसीजटामांसी॥स्मृतं(तेष्टौलिक्षास्तुतिस्त्रिस्रोगजसर्षपश्चले
गोरसस्तुतेत्रयः॥षट्तेयवोमस्तुतेत्रयःकृष्णलः॥पंचतेमाषकस्तुसुवर्णास्तु
षोडशःपलंसुवर्णाः॥चत्वारःपंचवापिप्राकीर्तितं॥रजतमानमाह॥द्वेकृ
ष्णलेरूप्यमाषोधरणंषोडशैवतु॥शतमानंतुदशभिर्धरणैःपलमेव
तु॥निष्कःसुवर्णाश्चत्वारइति॥ताम्रमानमाह॥कार्षिकःताम्रिकःपणस्तु

लिपलचतुर्थांशेनकर्षणोन्मतः ॥ कार्षिकःस्ताम्रसंबंधीपणोभवतिकर्षसं
ज्ञस्मानिर्दिष्टोत्तेषोडशमाषः कर्षोस्त्रीपलंकर्षचतुष्टयमितितेषोडशमा
षाः ॥ हेमाद्रौ नारदः ॥ सर्वकर्षइत्यर्थः धरणोत्रैवपुराणइतिसंज्ञां
तरंत्तेषोडशास्याद्धरणंपुराणश्चैवराजतमितिमिताक्षरायांस्मृतेः ॥
शानमानमध्येपयाप्येसुवर्णचतुष्टयंसमतोलितंरूप्यंराजतोनि
ष्कइत्यर्थः ॥ सुवर्णनिष्कस्तुचतुःसौवर्णिकोनिष्कोविज्ञेयस्तुप्रमा
णइतिमत्तकः ॥ सचपलसमानएवकोत्रकार्षापणइत्यपेक्षायां
देशभेदेनकार्षापणोभिन्नइत्याह ॥ हेमाद्रौ नारदः ॥ कार्षापणो
दक्षिणस्यांदिशिरौप्यंप्रवर्त्ततेपणैर्निबंधः ॥ पूर्वस्यांषोड
शैवपणाःस्युस्तुषोडशैवपणाअष्टैदशकार्षापणः ॥ पूर्वस्यामि

यर्थः॥ तावतालंभ्यं रूप्यं दक्षिणस्यां सा तिद्धेते निर्णये पितामहवरणाः॥ लीला
वत्यां॥ वराटकानां दशकद्वयं यत्सा काकिणी ताश्च पणश्चतस्रः॥ ते षोडश द्र
म्मोऽवगम्यो द्रम्मैस्तथा षोडशभिश्च निष्कः॥ इति॥ अथ धान्यमा
नं भविष्ये॥ पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतं॥ चतुर्भिः कुडवैः प्रस्थ
प्रस्थाश्चत्वार आढकः॥ आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः॥
कुंभो द्रोणद्वयं शूर्पं खारी द्रोणास्तु षोडश॥ द्रोणद्वयस्यैव शूर्प
इति संज्ञा॥ पलं च कुडवः प्रस्थः आढको द्रोण एव च॥ धान्यमाने
बुधैर्ज्ञेयाः क्रमशो मी चतुर्गुणाः॥ द्रोणैस्तु षोडश खारी विंशत्या
कुंभ उच्यते॥ कुंभैस्तु दशभिर्वाहो धान्यसंख्या प्रकीर्त्तिता॥
विंशत्येत्यत्रापि द्रोणैरिति संबंध्यते॥ तथा च कुंभो द्रोण

लिंगानिपीतवर्णानिश्वेतेनाप्यथवापिवा॥पीठंस्वपादंश्वेतेनपीतेनद्वारपूरणं॥मध्ये
स्युःशृंखलारक्ताःवल्लीनीलेनपूरयेत्॥भद्राणिपीतवर्णानिपीतानापंकजकर्णिका॥
आदेनिश्वेतवर्णानियद्विचित्राणिकल्पयेत्॥तिस्रोरेखाबहिःकार्यासितरक्ता
सिताःक्रमात्॥इति॥ ॥अथचतुर्लिंगोद्भवेलिंगे॥ ॥रेखादशप्रोक्ताश्चतु
र्लिंगसमुद्भवे॥कोणेदुत्रिपदश्वेतस्त्रिपदैःकृष्णश्रृंखला॥वल्लीसप्तपदा
नीलाभद्रेरक्तंचतुष्पदं॥भद्रपार्श्वेमहारुद्रंकृष्णमष्टादशैःपदैः॥शिवस्यपा
र्श्वतोवापीकुर्यात्वंवपदासितं॥पदमेकंतथापीतंभद्रवाप्यास्तुमध्यमः॥त्रि
रसिशृंखलायाश्चकुर्यात्पीतंपदत्रयं॥लिंगानांस्कंधतःकोष्ठाविंशतिर
रक्तवर्णकाः॥परिधिःपीतवर्णैस्तुपदैःषोडशभिःस्मृतः॥पदैस्तुनवभिःपद्मा
ष्टकंपद्मंसकर्णिकं॥ ॥अथद्वादशलिंगोद्भवं॥ ॥प्रागुदीच्यायतारेखाष
ड्विंशाद्विभकल्पयेत्॥पदानिद्वादशशतंपंचविंशतिरेवच॥खंडेदुःस्त्रिपदः
कोणेशृंखलाषट्पदैस्मृता॥त्रयोदशपदावल्लीभद्रंतुनवभिःपदैः॥त्रयो

दशापदावापीलिंगमष्टादशांसमन्वितं॥ लिंगत्रयस्यषट्कोष्ठा तु शोभाकोष्ठाश्चतुर्दश॥
तेषामुपरिपंक्तौ तु कोष्ठाः सप्तदशैव तु॥ पूजापंक्तिस्तु विज्ञेया परितः परिकल्पि
ता॥ पूजापंक्त्यंतरापंक्तौ कोष्ठाष्टाविंशतिसंख्यया॥ परिधिः सर्वविज्ञेयो मंडलं
रंतराद्वयोः॥ परिध्यंतरकोष्ठेषु सर्वतोभद्रमालिखेत्॥ विशेषश्चात्र विज्ञे
यः श्वेतखेलाबहुपदा भवेत्॥ त्रयोदशपदा वल्ली भद्रं तु नवभिः पदैः॥ पंच
विंशत्पदा वापी परिधिः षोडशात्मकः॥ मध्ये नवपदं पत्रं कर्णिकाकेसरान्वितं॥
सत्वं रजस्तमो वर्णाः परितो मंडलस्य तु॥ त्रयः परिधयः कार्यास्तत्र वाराणिकारये
त्॥ सीतेंदुः श्वेतखंडा कृष्णा वल्ली नीलेन पूरयेत्॥ भद्रं चैव वारुणं ज्ञेयं वापी स्याद्धवत
वर्णिका॥ लिंगानि कृष्णवर्णानि पार्श्वतो द्वादशैव तु॥ परिधिः पीतवर्णः स्यात्कम
लं पीतवर्णकं॥ ॥ इति लिंगतोभद्रमंडलानि॥ ॥ अथ मंडलदेवताः॥ तन्मध्ये श्री
ब्रह्माणं॥ ब्रह्मजज्ञानं गौतमो वामदेवो ब्रह्मा त्रिष्टुप्॥ ब्रह्मस्थापने पूजने विनियो १९
गः॥ एवमग्रेपि॥ ॐ ब्रह्मजज्ञानं ऋक्॥ ततउदीचीमारभ्य वायवीपर्यंतं॥ सो
मादयो देवा वाच्या। अष्टौ लोकपालाः स्थापनीयाः॥ आप्यायस्व राहुगणो सोमो गायत्री॥ गोत

ग्र० प०
२०

ॐ ओमासश्चर्षणी० ॥ यमनिर्ऋतिमध्येसत्ययक्ष्मान् ॥ अभित्यंदेवंसत्ययक्ष्माः प्रकृतिः ॥ ॐ
अभित्यंदेवंसवितारमोण्योः कविक्रतुमर्चामिसत्यसवंसरत्नधामभिप्रियंमतिंकविं ॥ उ
र्ध्वायस्यामतिर्भा अदिद्युतत्सविमानिहिरण्यपाणिरमिमीतसुक्रतुः कृपास्वः ॥ निर्ऋति
वरुणमध्येभूतनागान् ॥ आयंगौसार्पराज्ञिः सर्पोगायत्री ॥ ॐ आयंगोपृश्निरक्रमी० ॥ १५ ॥
वरुणवायुमध्येगंधर्वाप्सरसः ॥ अप्सरसामेतसौगंधर्वाप्सरसोनुष्टुप् ॥ ॐ अप्सरसां०
गंधर्वाणां० ॥ १६ ॥ ब्रह्मसोममध्येस्कंदनंदीश्वरशूलमहाकालान् ॥ कुमारंमाताकुमा
रः स्कंदस्त्रिष्टुप् ॥ ॐ कुमारंमाता० ॥ १७ ॥ ऋषभं ऋषभोवैराजोऋषभोनुष्टुप् ॥ ॐ ऋषभं
मासमानानां० ॥ १८ ॥ ब्रह्मेशानमध्येदक्षः ॥ अदितिर्लोक्योबृहस्पतिर्दक्षानुष्टुप् ॥ ॐ अदितिर्ह्यज
निष्ट० ॥ १९ ॥ ब्रह्मेंद्रमध्येदुर्गाविष्णुश्च ॥ तामग्निवर्णांसौभरिर्दुर्गास्त्रिष्टुप् ॥ ॐ तामग्निवर्णां ॥ २०
इदंविष्णुः काण्वोमेधातिथिर्विष्णुर्गायत्री ॥ ॐ इदंविष्णुर्विचक्रमे० ॥ २१ ॥ ब्रह्माग्निमध्येस्व
धां ॥ उदीरतांशंखः स्वधास्त्रिष्टुप् ॥ ॐ उदीरतामवरउत्० २२ ॥ ब्रह्मयमध्येमृत्युरो
गान् ॥ परंमृत्योः संकुशिकोमृत्युरोगास्त्रिष्टुप् ॥ ॐ परंमृत्यो अनुपरेहिपंथां० ॥ २३ ॥

श्री
२०

ब्रह्मनिर्ऋतिमध्येगणपतिं॥ गणानांत्वागृत्समदोगणपतिर्जगती॥ ॐ गणानांत्वागण
पतिं०।२४॥ ब्रह्मवरुणमध्ये अपः॥ शंन्नोदेवी अंबरिषः सिंधुद्वीप आपो गायत्री॥
ॐ शंन्नोदेवी०॥२५॥ ब्रह्मवायुमध्येमरुतः॥ मरुतोयस्यराहूगणोगोतमोमरुतोगा
यत्री॥ ॐ मरुतोयस्यहिक्षये०॥२६॥ ब्रह्मणःपादमूले कूर्मोकोधठपृथिवी॥ स्योना
काण्वोमेधातिथिर्भूमिर्गायत्री॥ ॐ स्योनापृथिवि॥२७॥ तत्रैवगंगानद्यः॥ इमंमे
सिंधुक्षित्प्रैयमेधागंगायमुनासरस्वत्योजगती॥ ॐ इमंमेगंगेयमुनेसरस्वति०॥
तत्रैवसप्तसागरान्॥ ॐ धाम्नोधाम्नोराजंन्नितोवरुणनोमुंच॥ यदापोअघ्न्या
वरुणेतिशपामहेततोवरुणनोमुंचसप्तविबाह्योमोषधीर्हिरीरिता २ विश्ववध्यव अभृ
स्वेतोवरुणनोमुंच॥ तदुपरिमेरवेनमः॥ ततोमंडलाद्बहिः॥ सोमसमीपेतक्रमेणायु
धानि॥ गदां १ त्रिशूलं २ वज्रं ३ शक्तिं ४ दंडं ५ खड्गं ६ पाशं ७ अंकुशं ८ तद्बाह्ये पुनर
पितेनैवक्रमेण॥ गौतमं १ भरद्वाजं २॥ विश्वामित्रं ३ कश्यपं ४ जमदग्निं ५ वसि
ष्ठं ६ अत्रिं ७ अरुंधतिं ८॥ तद्बाह्येपूर्वादिक्रमेण॥ ऐंद्रीं॥ कौमारीं॥ ब्रह्माणीं ब्राह्मीं॥
वाराहीं॥ चामुंडां॥ वैष्णवीं॥ माहेश्वरीं॥ वैनायकीं॥ इत्यष्टौ॥ तत्राक्षयेः प्रतिष्ठाप्य प्र

श्र०प्र०
२१

सेकंसहवाप्रतिष्ठाप्यपूजयेत्॥ ॥इतिमंडलदेवताः॥ ॥अथमुद्रालक्षणानिहेमाद्रौ॥
संमुखीकृत्यहस्तौद्वौकिंचित्संकुचितांगुली॥मुकुलीतुसमाख्यातापंकजंप्रदक्ष्यते
ववा॥१॥पूर्वोक्तामुकुलीयावत्प्रदेश्येनिस्तांगुलीः॥आकोशमुद्रामुकुलापद्म
मुद्राप्रदर्शयेत्॥२॥अंगुष्ठौकुंचितौतौतुस्वकीयांगुलिवेष्टितौ॥उद्धृताभिमुखौ
हस्तौयोजयित्वातुनिष्ठुरा॥३॥तर्जन्यौकुंचितौकृत्वातथैववकनीयसी॥अधोमु
खौदृढनखाग्रस्थितामध्यकरस्यत॥४॥ततस्त्रयश्चाश्रिताःपंच अंगुष्ठावेकतःकु
रु॥नालंभवास्थितौहस्तौतुव्योममुद्राप्रकीर्तिता॥५॥तंत्रांतरेसर्वदेवतापूजनेस
धारणेनषण्मुद्रादर्श्यंते॥देवतानानसंतुष्टासर्वदासंमुखीभवेत्॥अंगुष्ठौनि
क्षिपेत्सेयंमुद्रात्वावाहिनीमता॥१॥संग्रथ्यनिक्षिपेत्सेयंमुद्रात्वाहवनीस्मृता॥
अधोमुखीत्वियंचेत्स्यात्स्थापनीमुद्रिकामता॥२॥उछ्रितावुछ्रितौकुर्यात्संमु
खीकरणीभवेत्॥प्रसृतांगुलिकौहस्तौमिथःश्लिष्टौतुसंमुखौ॥३॥कुर्यात्स्व
हृदयंस्वयंमुद्राप्रार्थनसंज्ञिका॥इत्येवंसर्वदेवानांपूजनेषट्प्रदर्शयेत्॥४॥

श्री
२१

॥शिवपूजे लिंगमुद्रा॥ ॥उच्छ्रितं दक्षिणांगुष्ठं वामांगुष्ठेन बंधयेत्॥ वामांगुलिर्दक्षि
णाभिरंगुलीभिश्च वेष्टयेत्॥१॥ लिंगमुद्रेयमाख्याता शिवसांनिध्यकारिणी॥ श्रीक्र
मः॥ शीर्षे कुर्वीत राज्यकामस्तु नेत्रयोः॥ मुखे स्वन्नाद्यकामस्तु ग्रीवायां रोगशांति
कृत्॥ हृदये सर्वकामी च ज्ञानार्थी नाभिमंडले॥ राज्यकामस्तु गुह्ये वैराग्यकामस्तु पादयोः॥
॥रामपूजने सप्तदशमुद्राः॥ ॥तथा च रामार्चनचंद्रिकायां अगस्त्यः॥ ॥आवा
हनी स्थापनी च सन्निधीकरिणी तथा॥ सुसंनिरोधिनी मुद्रा संमुखीकरिणी त
था॥ सकलीकरिणी चैव महामुद्रा तथैव च॥ शंखचक्रगदापद्मधेनुकौस्तुभगारुडाः॥
श्रीवत्सवनमाले च योनिमुद्रां प्रदर्शयेत्॥ एताभिः सप्तदशभिः मुद्राभिस्तु विच
क्षणः॥ यो राममर्चयेन्नित्यं मोदयत्सुसुरेश्वरः॥ द्रावयेदपि विघ्नं द्रु ततः प्रार्थितमाप्नु
यात्॥ मूलाधाराद्द्वादशांतमानीतः कुसुमांजलिः॥ त्रिस्थानगततेजोभिर्विनीतः प्र
तिमादिषु॥ आवाहनीयं मुद्रा स्यादिवार्चनविधौ मुने॥ एषैवाधोमुद्रा स्थापनेद्रा

श्रता प०
२२

स्यतेपुनः॥उत्तानांगुष्ठयोगेनमुष्टीकृतकरद्वयं॥संन्निधीकरिणीमुद्रादेवार्चनविधौमु
ने॥अंगुष्ठगर्भिणीसैवमुद्रास्यात्संन्निरोधिनी॥उत्तानमुष्टियुगुलासंमुखीकरणी
मता॥अंगैरेवांगविन्यासःसकलीकरणीभवेत्॥अन्योन्यांगुष्ठसंलग्नाविस्तारीत
करद्वयं॥महामुद्रेयमाख्यातान्यूनाधिकसमापनी॥कनिष्ठानामिकामध्यातस्त्वा
गुष्ठातदग्रतः॥आपितांगुष्ठमूलेनसंलग्नामुकुलीकृता॥करद्वयेनमुद्रास्याछंखाख्य
यंसुरार्चने॥अन्योन्याभिमुखस्पर्शाव्यस्ताप्यनतुवेष्टयेत्॥अंगुलीभिःप्रयत्नेन
मंडलीकरणंमुने॥वक्रमुद्रेयमाख्यातागदमुद्राततःपरं॥अन्योन्याभिमुखाश्लि
ष्टाततःकौस्तुभसंज्ञका॥कनिष्ठेन्योन्यसंलग्नेभिमुखेवहिःपरस्परं॥वामस्यतर्ज
नीमध्येमध्यानामिकयोस्त्विपति॥वामानामिक—संस्पृष्टातर्जनीमध्यग्रे।
भिता॥पर्यायेणानतांगुष्ठद्वयीकौस्तुभलक्षणा॥कनिष्ठान्योन्यसंलग्ना
विपरीततुयोजिता॥अधस्थशाखाप्पितांगुष्ठामुद्रागारुडसंज्ञका॥तर्जन्य
गुष्ठमध्यस्थामध्यमानामिकाद्वयी॥कनिष्ठानामिकामध्यतर्जन्यग्रकर

श्री
२२

हृयी॥मुनेश्रीवत्समुद्रेयंवनमालासवेत्ततः॥कनिष्ठानामिकामध्यामुष्टिरुत्त
तर्जनी॥परिष्मांता॥शिरस्मुद्रैतर्जनीभ्यां॥द्विवोकसः॥योनिमुद्रासमाख्या
ताद्योतकरहृद्याश्रिता॥तर्जन्या कृष्टमध्यांतस्थितानामिकयोर्मिका॥म
ध्यास्थितस्थितांगुष्ठांयेयंद्रास्त्रमुनेवनेइति॥ ॥इतिमुद्रालक्षणं॥ ॥
अथापचारापादार्थादर्द्ज्ञानमालायां॥ ॥अष्टत्रिंशात्षोडशोदशपंचोप
चारकाः॥तान्विभज्यप्रवक्ष्यामिकेतेतेभ्यक्वलेभ्यकि॥अर्घ्यंचपाद्यावम
नेमधुपर्कमुपस्पर्शं॥स्नानंनीराजातंवस्त्रमाचमंचोपवीतकं॥पुन
राचामभूतंवदर्पणालोकनंततः॥गंधपुष्पेधूपदीपेनैवेद्यंततःक्रमात्॥
पानीयंतोयमाचामंहस्तवासःस्ततःपरं॥हस्तवासःकरोद्वर्तनं॥तांबूल
मनुलेपंचपुष्पदानंततःपुनः॥गीतंवाद्यंतथानृत्यंस्तुतिंचैवप्रदक्षिणं॥
पुष्पांजलिंनमस्कारवष्टत्रिंशत्समीरिता॥ ॥आसनंस्वागतंचार्घ्यंपाद्यमाच
मनीयकं॥मधुपर्कासनस्नानंवसनाभरणानिच॥सुगंधःसुमनोधूपदी

व्रतार्कपरि॰

२३

पमंत्रेणतर्पणं॥माल्यानुलेपनेचैवनमस्कारविसर्जने॥इतिषोडश॥ ॥अर्घ्य
पाद्याचमान्येवमधुपर्काचमान्यपि॥गंधाद्योनिवेद्यांताउपचारादश॥क्रमात्
इति॥दश॥गंधपुष्पधूपदीपनैवेद्यंपंचमंस्मृतम्मिति॥पंच॥ ॥ब्राह्मदातिल
केषोडशोक्ताः॥ ॥तथा॥आसनस्नानवस्त्रभूषणानिपरीसज्यद्वादश
महाकपिलपंचरात्रे॥गंधतैलमथोदद्याद्देवस्याभ्रतिमंततः॥दूर्वाचविष्णु
क्रांतावश्यामकंपद्ममेवच॥पाद्यांकानिचचत्वारिकथितानिसमासतः॥क
र्पूरंमगरूंपुष्पद्रव्याण्याचमनीयके॥सिद्धार्थमक्षतंचैवदूर्वांचतिलमेवच॥पंच
गंधंफलंपुष्पमष्टांगलघ्यंउच्यते॥स्नानेवस्त्रेतथाभक्ष्येदद्यादाचमनीयक
कं॥उद्वर्तनमपिलत्रैव॥रजनीसहदेवीचशिरीषलक्ष्मणापिच॥महाभद्राकु
शाग्राणिउद्वर्तनमिहोच्यते॥मंत्रतंत्रप्रकाशे॥ ॥अक्षतागंधपुष्पाणिस्त्रा
नपात्रेतथात्रयं॥तत्रैव॥द्रव्याभावेप्रदातव्याःक्षालितास्तंडुलाःशुभाः॥
अगस्त्यसंहितायां॥ ॥तथाचमनपात्रेपिदद्याज्जातिफलंमुने॥लवंगमपि

श्री

२३

कंकोलं शास्त्रमाचमनीयके ॥ उक्तद्रव्याभावे मंत्रांतरे ॥ तंदुलान्निक्षिपेत्तेषु
द्रव्याभावे पितस्मरन् ॥ ॥प्रयोगपारिजाते व्यासः ॥ ॥प्रतिमापट्टयंत्रा
णां नित्यस्नानं न कारयेत् ॥ कारयेत्पर्वदिवसे यदा मलविशुद्धये ॥ स्ना
नमाल्लायां ॥ ॥नाक्षतैरर्चयेद्विष्णुं न तुलस्या गणाधिपं ॥ न दूर्वाया जयेद्दे
वीं बिल्वपत्रैर्दिवाकरं ॥ उन्मत्तमर्कपुष्पं च विष्णोर्वर्ज्यं सदा बुधैः ॥ अक्ष
तास्तु यवाः प्रोक्ताऽनिपादार्थादिदर्शे ॥ उक्तत्वाद्यवानामेवायं प्रतिषेधो न तं
दुलादीनां ॥ ॥तंत्रांतरे ॥ ॥महाभिषेकं सर्वत्र शंखेनैव प्रकल्पयेत् ॥ सर्वत्रैव
प्रशस्तावाः द्विवसूर्योर्चनो विनेति ॥ ॥अथ व्रतोद्यापने उक्तो विधिः ॥ ॥पृथ्वी
चंद्रोदये नंदिपुराणे ॥ ॥कुर्यादुद्यापनं तस्य समाप्तौ यदुदीरितं ॥ उद्याप
नं विना यत्तु तद्व्रतं निष्फलं भवेत् ॥ यत्र वोद्यापनं नोक्तं व्रतानुगुणतः स्मरेत् ॥
वित्तानुसारतो दद्यादनुक्तोद्यापने व्रते ॥ गां वै वकांचनं दद्याद्व्रतस्य परिपू
र्तये ॥ ॥समासोद्यापनमनुक्तोद्यापनविषयं ॥ ॥उक्तोद्यापने तु ॥ प्रो

व्रतार्कप०
२५

दौर्मध्येतथाप्यंतेव्रतस्योद्यापनंभवेत्॥अथव्रतभंगेसंपूर्णतांविधिर्देहमोद्दोभविष्ये॥ ॥
युधिष्ठिरउवाच॥ ॥संपूर्णतामनुष्ठानेव्रतानांतुजनार्दन॥कुरुप्रसादंयुष्मार्थमेतन्मे
वक्तुमर्हसि॥श्रीकृष्णउवाच॥ ॥साधुसाधुमहाबाहोकुरुराजयुधिष्ठिर॥रह
स्यानांरहस्यंतत्कथयामिव्रतेनव॥संपूर्णताकृतायत्रलक्ष्म्यकृष्णसुखप्रदं॥यद्वी
र्णंनरनारीभिर्भवेत्संपूर्णकारकं॥अवश्यंतद्विकर्तव्यंसंपूर्णफलकांक्षिभिः॥किं
विद्व्रतंप्रमादेनयद्भूतंव्रतिनास्थितं॥तत्संपूर्णंभवेत्सर्वंव्रतेनानेनपांडव॥यद्गतांकि
विद्दैवस्याव्रतविघ्नविनाशनं॥तत्संपूर्णंचभवेत्सार्थंसस्यसत्यंनसंशयः॥कांच
नंरूप्यकंरूपंशिल्पिनातुकघटापयेत्॥भग्नव्रतस्ययोदेवंतस्यरूपंविनिर्मितं॥
व्रतस्त्रीपुंसयोर्वाथप्रारब्धंयद्व्रतंकिल॥नरवनिष्पादितंकिंचिद्दैवात्सर्वंतथा
स्थितं॥द्विभुजंपंकजारूढसौम्यंप्रहसिताननं॥निष्पादितंशिल्पिनावतस्मि
न्नेवदिनेपुनः॥तन्मामेलुमनःप्रोत्सन्नात्मयोविधिनागृहे॥स्नापयेत्पयसा
दध्नाघृतक्षौद्रसंबुबुभिः॥गंधचंदनपुष्पैस्तुश्चपूजांकुर्यात्समाहितं॥

श्री
२५

तोयपूर्णस्यकुंभस्यमुँखेवेविन्यस्यदेवतां॥धूपदीपाक्षतैर्वस्त्रैरत्नैर्बहुप्रकारकैः॥अर्घ्यंप्र
दद्यात्तद्देवंमंत्रेणानेनसर्वदा॥पांडव॥उपासनस्यदानस्यप्राप्ताश्चैवतंकृतंजले॥द्वा
मुणंवःप्रसंन्नास्मःकुरुक्षायदर्पापुनः॥प्रसन्नोभवभीतस्याभिंन्नयंयंप्रतस्यष्व॥
कुरुप्रासादसंपूर्णंव्रतंसंजायतीमम॥यज्ञछिद्रंतपछिद्रंयछिद्रंयज्ञकर्मणि॥तत्स
र्वंत्वत्प्रसादेनुसंपूर्णंजायतांमम॥पूर्वदक्षिणपश्चात्त्वनुत्तरेवबलिंहरेत्॥उप
यभस्तात्सर्वेभ्योदिक्पालेभ्योनमोनमः॥इदमर्घ्यमिदंपाद्यंतेभ्यःस्तेभ्योनमो
नमः॥पादौवजानुनीचैवकटिंशीर्षकवक्षसि॥कुक्षिंतुहृदयंपश्चवाकुवक्षुश्च
शिरोरुहान्॥पूजयित्वास्यदेवस्यततःपश्चात्समापयेत्॥पूजितस्त्वंयथाशक्त्या
नमस्तेस्तुसुरोत्तमं॥गृहीत्वामुष्मिकादेवकार्यसिद्धिंदिशस्वमे॥एवंक्षमाप
यित्वातुदेवंतुपविधानलः॥तन्मूर्तिवह्निजातिभ्योविधिवत्प्रतिपादयेत्॥स्थि
त्वापूर्वामुखेवाविप्रोगत्क्रियादर्भपाणिना॥विप्रहस्तेप्रयच्छेत्तुदद्यातावैवोत्त
रामुखः॥मंत्रेणानेनकौन्तेयसोपवासप्रयत्नतः॥इदंव्रतंमयाचैवकृतमासी

व्रतार्कपरि॰

२९

सुराद्विज॥ तत्सर्वंपूर्णमेवास्तुतवमूर्त्तिप्रधानतः॥ ब्राह्मणोपिभयछेत्रमंत्रेणा
णानेनतद्व्रतं॥ वाक्यपूर्णमतःपूजाव्रतेनानेनतेपुरा॥ संपूर्णस्याप्रसादेनतवपू
र्णामनोरथाः॥ ब्राह्मणायत्रभोगंतेतन्मन्यंतेदिवौकसः॥ सर्वदेवमयाविप्रा
नतद्वचनमन्यथा॥ जलधीःक्षीरतांनीतःपावकःसर्वभक्षतां॥ सहस्रनेत्रःश
क्रोपिकृतोविप्रैर्महात्मभिः॥ ब्राह्मणानांतुवचनाब्रह्महत्याविनश्यति॥ अ
श्वमेधफलंतस्यसांगंलभतेनात्रसंशयः॥ व्यासवाल्मीकिवचनापराशरव
सिष्ठयोः॥ गर्गगौतमधौम्यात्रिवासिष्ठांगिरसस्तथा॥ वचनान्नारदादी
नांपूर्णंभवतुमेव्रतं॥ एवंविधिविधानेनगृहीत्वाब्राह्मणोव्रजेत्॥ दातातस्मै
षयेत्सर्वंब्राह्मणस्यगृहेस्वयं॥ ततःपंचमहायज्ञान्निर्वपेद्राजनादिकं॥ एवंयः
कुरुतेभक्त्याव्रतमुत्तमंनरोत्तम॥ तस्यसंपूर्णतांयातितद्व्रतंयत्पुराकृतं॥ एवंसंपूर्ण
तांयातिप्रसन्नेव्रतदेवते॥ भग्नानियानिमदमोहवशाद्गृहीत्वाजन्मांतरेष्वपिनरेणस
मस्तरेणसंपूर्णपूजनपरस्यपुरोभवंतिसर्वव्रतानिपरिपूर्णफलप्रदानि॥ ॥इतिव्रतार्केभग्नव्रतसमाप्तं॥ ॥
॥इतिभविष्योत्तरपुराणेभग्नव्रतंसंपूर्णं॥ ॥इतिव्रतार्केपरिभाषासमाप्तः॥ ॥७९॥

श्री

२९

Missing page - ~~20,21~~ 17,18